कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥ अथ चतुर्थ काण्डे तृतीयः प्रश्नः॥

हरिः ओम्॥ अपां त्वेमन्थ्सादयाम्यपां त्वोद्मन्थ्सादयाम्यपां त्वा भस्मन्थ्सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वाऽयने सादयाम्यर्णवे सदने सीद समुद्रे सदने सीद सलिले सदने सीदाऽपांक्षये सीदाऽपाग्ं सधिषि सीदाऽपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पाथसि सादयामि गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्दोऽनुष्टुप्छन्दः पङ्क्तिश्छन्दः॥[१]

योनौ पञ्चदश च॥4.3.1॥

अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्रियै गायत्रं गायत्रादुपाग्ंशु रुपाग्ंशो स्त्रिवृत्त्रिवृतो रथन्तरग्ं रथन्तराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्योऽयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुग्ग्रैष्मी त्रिष्टुभ ऐडमैडादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहतो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो [२] गृह्णामि प्रजाभ्यो ऽयं पश्चाद्विश्वव्यचास्तस्य

चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या ऋक्षममृक्षमाच्छुक्रः शुक्राथ्सप्तदशः सप्तदशाद्वैरूपं वैरूपाद्विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्य इदमुत्तराथ्सुवस्तस्य श्रोत्रग्ं सौवग्ं शरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभः स्वारग्ग् स्वारान्मन्थी मन्थिन एकविग्ंश एकविग्ंशाद्वैराजं वैराजाज्जमदग्निर्ऋषिः प्रजापतिगृहीतया [३] त्वया श्रोत्रं गृह्णामि प्रजाभ्य इयमुपरि मतिस्तस्यै वाङ्माती हेमन्तो वाच्यायनः पङ्क्तैर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात्त्रिणवत्रयस्त्रिग्ंशौ त्रिणवत्रयस्त्रिग्ंशाभ्याग्ं शाक्वररैवते शाक्वररैवताभ्यां विश्वकर्मर्षिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः॥[४]

त्वया मनो जमदग्निर् ऋषिः प्रजापतिगृहीतया त्रिग्ंशच्च॥4.3.2॥

प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृथ्स्तोमः स उ पञ्चदशवर्तनिस्न्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिर्दक्षिणा दिशां ग्रीष्म ऋतूनामिन्द्रो देवता क्षत्रं द्रविणं पञ्चदशः स्तोमः स उ सप्तदशवर्तनिर्दित्यवाड्वयस्त्रेताऽयानां दक्षिणाद्वातो वातः सनातन ऋषिः प्रतीची दिशां वर्षा ऋतूनां विश्वे देवा देवता विड् [५] द्रविणग्ं सप्तदशः स्तोमः स उ एकविग्ंशवर्तनिस्त्रिवथ्सो वयो द्वापरोऽयानां पश्चाद्वातो

वातोऽहभून ऋषिरुदीची दिशाग्ं शरदृतूनां मित्रावरुणौ देवता पुष्टं द्रविणमेकविग्ंशः स्तोमः स उ त्रिणववर्तनिस्तुर्यवाड्वय आस्कन्दोऽयानामुत्तराद्वातो वातः प्रऽन ऋषिरूर्ध्वा दिशाग्ं हेमन्तशिशिरावृतूनां बृहस्पतिर्देवता वर्चो द्रविणं त्रिणवः स्तोमः स उ त्रयस्त्रिग्ंशवर्तनिः पष्ठवाद्वयोऽभिभूरयानां विष्वग्वातो वातः सुपर्ण ऋषिः पितरः पितामहाः परेऽवरे ते नः पान्तु ते नोऽवन्त्वस्मिन्ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याम्॥[६]

विट्पष्ठवाद्वयोऽष्टाविग्ंशतिश्च॥4.3.3॥

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवां योनिमा सीद साध्या। उख्यस्य केतुं प्रथमं पुरस्तादश्विनाऽध्वर्यू सादयतामिह त्वा॥ स्वे दक्षे दक्षपितेह सीद देवत्रा पृथिवी बृहती रराणा। स्वासस्था तनुवा सं विशस्व पितेवैधि सूनव आ सुशेवाऽश्विनाऽध्वर्यू सादयतामिह त्वा॥ कुलायिनी वसुमती वयोधा रयिं नो वर्ध बहुलग्ं सुवीरम्। [७] अपाऽमतिं दुर्मतिं बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर्धेहि यजमानाय पोषमश्विनाऽध्वर्यू सादयतामिह त्वा॥ अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभि गृणन्तु देवाः। स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽ यजस्वाऽश्विनाऽध्वर्यू सादयतामिह त्वा॥ दिवो मूर्धाऽसि पृथिव्या नाभिर्विष्टं भनी दिशामधिपत्नी

भुवनानाम्॥ [८] ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाऽध्वर्यू सादयतामिह त्वा॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजू रुद्रैः सजूरादित्यैः सजूर्विश्वैर्देवैः सजूर्देवैः सजूर्देववैर्वयोनाधैरग्नये त्वा वैश्वानरायाऽश्विनाऽध्वर्यू सादयतामिह त्वा॥ प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म उर्व्या वि भाहि श्रोत्रं मे श्लोकयाऽपस्पिन्वौषधी र्जिन्व द्विपात्पाहि चतुष्पादव दिवो वृष्टिमेरय॥[९]

सुवीरं भुवनामुर्व्या सप्तदश च॥4.3.4॥

न्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः पञ्चाविर्वयो गायत्री छन्दस्त्रिवथ्सो वय उष्णिहा छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः सतोबृहती छन्द ऋषभो वयः ककुच्छन्दो धेनुर्वयो जगती छन्दोऽनड्वान्वयः पङ्क्तिश्छन्दो बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिग्ंहो वयश्छद्श्छन्दो विष्टं भो वयोऽधिपतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो मूर्धा वयः प्रजापतिश्छन्दः॥[१०]

पुरुषो वयष्षड्विग्ंशतिश्च॥4.3.5॥

इन्द्राग्नी अव्यथमानामिष्टकां दृग्ंहतं युवम्। पृष्ठेन द्यावापृथिवी अन्तरिक्षं च

वि बाधताम्॥ विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं भास्वतीग्ं सूरिमतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षमन्तरिक्षं यच्छान्तरिक्षंदृग्ंहान्तरिक्षं मा हिग्ंसीर्विश्वस्मै प्राणायाऽपानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा [११] शन्तमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद। राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगायुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे जिन्व वाचं मे पिन्वाऽत्मानं मे पाहि ज्योतिर्मे यच्छ॥[१२]

छर्दिषा पिन्व षट्च॥4.3.6॥

मा छन्दः प्रमा छन्दः प्रतिमा छन्दोऽस्त्रीविश्छन्दः पङ्क्तिश्छन्द उष्णिहा छन्दो बृहती छन्दोऽनुष्टुप्छन्दो विराट्छन्दो गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्दः पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो मनश्छन्दो वाक्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजा छन्दोऽश्वश्छन्दः॥ अग्निर्देवता [१३] वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता विश्वे देवा देवता मरुतो देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता मूर्धाऽसि राड्ध्रुवाऽसि धरुणा

यन्त्र्यसि यमित्रीषे त्वोर्जे त्वा कृष्यै त्वा क्षेमाय त्वा यन्त्री राड्ध्रुवासि धरणी धर्त्र्यऽसि धरित्र्यायुषे त्वा वर्चसे त्वौजसे त्वा बलाय त्वा॥[१४]

देवताऽऽयुषे त्वा षट्च॥4.3.7॥

आशुस्त्रिवृद्भान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशोऽभिवर्तः सविग्ंशो धरुण एकविग्ंशो वर्चो द्वाविग्ंशः सं भरणस्त्रयोविग्ंशो योनिश्चतुर्विग्ंशो गर्भाः पञ्चविग्ंश ओजस्त्रिणवः क्रतुरेकत्रिग्ंशः प्रतिष्ठा त्रयस्त्रिग्ंशो ब्रध्नस्य विष्टपं चतुस्त्रिग्ंशो नाकः षट्त्रिग्ंशो विवर्तोऽष्टाचत्वारिग्ंशो धर्त्रश्चतुष्टोमः॥[१५]

आशुः सप्तत्रिग्ंशत्॥4.3.8॥

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृथ्स्तोम इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रग्ग् स्पृतं पञ्चदशः स्तोमो नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रग्ग् स्पृतग्ं सप्तदशः स्तोमो मित्रस्य भागोऽसि वरुणस्याऽऽधिपत्यं दिवो वृष्टिर्वाताः स्पृता एकविग्ंशः स्तोमोऽदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्पृतं त्रिणवः स्तोमो वसूनां भागोऽसि [१६] रुद्राणामाधिपत्यं चतुष्पाथ्स्पृतं चतुर्विग्ंशः स्तोम आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भाः स्पृताः पञ्चविग्ंशः स्तोमो

देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यग्ं समीचीर्दिशः स्पृताश्चतुष्टोमः स्तोमो यावानां भागोऽस्ययावानामाधिपत्यं प्रजाः स्पृताश्चतुश्चत्वारिग्ंशः स्तोम ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं निशान्तग्ग् स्पृतं त्रयस्त्रिग्ंशः स्तोमः॥[१७]

वसूनां भागोसि षट्चत्वारिग्ंशच्च॥4.3.9॥

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत ब्रह्माऽसृज्यत ब्रह्मणस्पतिरधिपतिरासीत्पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीथ्सप्तभिरस्तुवत सप्तर्षयोऽसृज्यन्त धाताऽधिपतिरासीन्नवभिरस्तुवत

पितरोऽसृज्यन्ताऽदितिरधिपत्न्यासीदेकादशभिरस्तुवतर्तवोऽसृज्यन्ताऽऽर्तवो ऽधिपतिरासीत्त्रयोदशभिरस्तुवत मासा असृज्यन्त संवथ्सरोऽधिपति- [१८] रासीत्पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीथ्सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीन्नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्तामेकविग्ंशत्याऽस्तुवतैकशफाः पशवो ऽसृज्यन्त वरुणोऽधिपतिरासीत्त्रयोविग्ंशत्याऽस्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत्पञ्चविग्ंशत्याऽस्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीथ्सप्तविग्ंशत्याऽस्तुवत द्यावापृथिवी व्यै-

[१९] तां वसवो रुद्रा आदित्या अनु व्यायन्तेषामाधिपत्यमासीन्नवविग्ं शत्याऽस्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदेकत्रिग्ं शतास्तुवत प्रजा असृज्यन्त यावानां चाऽयावानां चाऽऽधिपत्यमासीत्त्रयस्त्रिग्ं शताऽस्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत्॥[२०]

संवथ्सरोऽधिपतिर्वि पञ्चत्रिग्ंशच्च॥4.3.10॥

इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा। वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचन्ते॥ छन्दस्वती उषसा पेपिशाने समानं योनिमनु संचरन्ती। सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा॥ ऋतस्य पन्थामनु तिस्त्र आऽगुस्त्रयो घर्मासो अनु ज्योतिषाऽऽगुः। प्रजामेका रक्षत्यूर्जमेका [२१] व्रतमेका रक्षति देवयूनाम्॥ चतुष्टोमो अभवद्या तुरीया यज्ञस्य पक्षावृषयो भवन्ती। गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कं युञ्जानाः सुवराऽभरन्निदम्॥ पञ्चभिर्धाता वि दधाविदं यत्तासाग् स्वसृरजनयत्पञ्चपञ्च। तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि ऋतवो वसानाः॥ त्रिग्ंशथ्स्वसार उप यन्ति निष्कृतग्ं समानं केतुं प्रतिमुञ्चमानाः।[२२] ऋतूग् स्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परि यन्ति भास्वतीः॥ ज्योतिष्मती प्रति मुञ्चते नभो रात्री देवी सूर्यस्य

व्रतानि। वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे॥ एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम्। तेन दस्यून्व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः॥ अनानुजामनुजां मामकर्त सत्यं वदन्त्यन्विच्छ एतत्। भूयास- [२३] मस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त॥ अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम्। भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त॥ पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च। पञ्च दिशः पञ्चदशेन क्लुप्ताः समानमूर्ध्नीरभि लोकमेकम्॥ [२४] ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति। सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नि यच्छति॥ या प्रथमा व्यौच्छथ्सा धेनुरभवद्यमे। सा नः पयस्वती धुक्ष्वोत्तरामुत्तराग्ं समाम्॥ शुक्रर्षभा नभसा ज्योतिषाऽऽगाद्विश्वरूपा शबलीरग्निकेतुः। समानमर्थग्ग् स्वपस्यमाना बिभ्रती जरामजर उष आऽगाः॥ ऋतूनां पत्नी प्रथमेयमाऽगादह्नां नेत्री जनित्री प्रजानाम्। एका सती बहुधोषो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्यत्॥[२५]

ऊर्जमेका प्रतिमुञ्चमाना भूयासमेकं पत्न्येकान्न विग्ंशतिश्च॥4.3.11॥

अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व। अस्मे

दीदिहि सुमना अहेडन्तव स्याग्ं शर्मन् त्रिवरूथ उद्भित्॥ सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व। अधि नो ब्रूहि सुमनस्यमानो वयग्ग् स्याम प्र णुदा नः सपत्नान्॥ चतुश्चत्वारिग्ंशः स्तोमो वर्चो द्रविणग्ं षोडशः स्तोम ओजो द्रविणं पृथिव्याः पुरीषमस्य– [२६] प्सो नाम। एवश्छन्दो वरिवश्छन्दः शं भूश्छन्दः परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः सिन्धुश्छन्दः समुद्रं छन्दः सलिलं छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरं छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सष्टुप्छन्दोऽनुष्टुप्छन्दः ककुच्छन्दस्त्रिककुच्छन्दः काव्यं छन्दोऽङ्कुपं छन्दः [२७] पदपङ्क्तिश्छन्दोऽक्षरपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भृज्वाञ्छन्दः प्रच्छच्छन्दः पक्षश्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विशालं छन्दो विष्पर्धाश्छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दोऽङ्गाङ्गं छन्दः॥[२८]

अस्यङ्कुपं छन्दस्त्रयस्त्रिग्ंशच्च॥4.3.12॥

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः॥ त्वग्ं सोमाऽसि सत्पतिस्त्वग्ं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः॥ भद्रा ते अग्ने स्वनीक सन्दृघ्घोरस्य सतो विषुणस्य चारुः। न यत्ते शोचिस्तमसा

वरन्त न ध्वस्मानस्तनुवि रेप आ धुः॥ भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य।[२९] रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम्॥ सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाग्ं आयजिष्ठः स्वस्ति। अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि॥ स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव। यथ्सीमहि दिविजात प्रशस्तं तदस्मासु द्रविणं धेहि चित्रम्॥ यथा होतर्मनुषो [३०] देवता ता यज्ञेभिः सूनो सहसो यजासि। एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान्॥ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारग्ं रत्नधातमम्॥ वृषा सोम द्युमाग्ं असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे॥ सान्तपना इदग्ं हविर्मरुतस्तज्जुजुष्टन। युष्माकोती रिशादसः॥ यो नो मर्तो वसवो दुर्हृणायुस्तिरः सत्यानि मरुतो [३१] जिघाग्ंसात्। द्रुहः पाशं प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तना तम्॥ संवथ्सरीणा मरुतः स्वर्का उरुक्षयाः सगणा मानुषेषु। तेऽस्मत्पाशान् प्र मुञ्चन्त्वग्ंहसः सांतपना मदिरा मादयिष्णवः॥ पिप्रीहि देवाग्ं उशतो यविष्ठ विद्वाग्ं ऋतूग्ं रृतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने त्वग्ं होतृणामस्यायजिष्ठः॥ अग्ने यदद्य विशो अध्वरस्य होतः पावक [३२] शोचे वेष्ट्वग्ं हि यज्वा। ऋता यजासि महिना वि यद्भूरहव्या वह यविष्ठ या ते अद्या॥ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमम्॥ गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः।

सुमित्रः सोम नो भव॥ गृहमेधास आ गत मरुतो माऽप भूतन। प्रमुञ्चन्तो नो अग्ंहसः॥ पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम्। महोभि [३३] श्चचर्षणीनाम्॥ प्र बुध्निया ईरते वो महाग्ंसि प्र णामानि प्रयज्यवस्तिरध्वम्। सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम्॥ उप यमेति युवतिः सुदक्षं दोषा वस्तोर् हविष्मती घृताची। उप स्वैनमरमतिर्वसूयुः॥ इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ। प्रति न ईग्ं सुरभीणि वियन्तु। क्रीडं वः शर्धो मारुतमनर्वाणग्ं रथेशुभम्। [३४] कण्वा अभि प्र गायत॥ अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः। ते हर्म्येष्ठाः शिशवो न शुभ्रा वथ्सासो न प्रक्रीडिनः पयोधाः॥ प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे। ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः॥ उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन [३५] चित्पथा। श्रोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते॥ अग्निमग्निग्ं हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम्॥ तग्ं हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता। अग्निग्ं हव्याय वोढवे॥ इन्द्राग्नी रोचना दिवः श्नथद्वृत्रमिन्द्रं वो विश्वतस्परीन्द्रं नरोविश्वकर्मन् हविषा वावृधानो विश्वकर्मन् हविषा वर्धनेन॥ [३६]

सूर्यस्य मनुषो मरुतः पावक महोभी रथे शुभं केन षट्चत्वारिग्ंशच्च॥4.3.13॥

अपांत्वेमन्नयं पुरः प्राची धुवक्षितिस्त्य विरिन्द्राग्नी मा छन्द आशुस्त्रिवृदग्नेर्भागोऽस्येकयेयमेव सा याऽग्ने जातानग्निर्वृत्राणि त्रयोदश॥13॥

अपां त्वेन्द्राग्नी इयमेव देवताता षट्त्रिग्ंशत्॥३६॥

अपां त्वेर्म हविषा वर्धनेन॥

॥ हरिः ओम्॥

॥ श्री कृष्णार्पणमस्तु॥

॥ इति चतुर्थकाण्डे तृतीयः प्रश्नः॥